## निमूलसमूलयोः कषः । (३४/३३८८)

कर्मणि इत्येव । निमूलसमूल[1]शब्दयोः कर्मवाचिनोरुपपदयोः कषेः[2]धातोः णमुल् प्रत्ययो भवति । निमूलकाषं कषति । समूलकाषं कषति । निमूलं समूलं कषति इत्यर्थः । इतः प्रभृति [3]कषादीन् यान् वक्ष्यति [4]तत्र 'कषादिषु यथाविध्यनुप्रयोगः' (३.४.४६/३३६७) इति ॥

## शुष्कचूर्णरूक्षेषु पिषः । (३५/३३८६)

[5]कर्मणि इत्येव । शुष्कादिषु कर्मवाचिषु उपपदेषु पिषेर्धातोः णमुल् [6]प्रत्ययो भवति । शुष्कपेषं पिनष्टि । शुष्कं पिनष्टि इत्यर्थः । चूर्णपेषं पिनष्टि । चूर्णं [7]पिनष्टि इत्यर्थः । रूक्षपेषं [8]पिनष्टि । रूक्षं [9]पिनष्टि इत्यर्थः ॥

## समूलाकृतजीवेषु हनकृञ्ग्रहः । (३६/३३८७)

कर्मणि [10]इत्येव । [11]समूल अकृत जीव [12]इत्येतेषु शब्देषु [13]कर्मसु उपपदेषु यथासङ्ख्यं [14]हन् कृञ् ग्रह इत्येतेभ्यो धातुभ्यो णमुल् प्रत्ययो भवति । समूलघातं हन्ति । समूलं हन्ति इत्यर्थः । अकृतकारं करोति । जीवग्राहं गृह्णाति[15] ॥

## करणे हनः । (३७/३३८८)

करणे उपपदे हन्तेर्धातोः णमुल् प्रत्ययो भवति । पाणिघातं वेदिं हन्ति । पादघातं भूमिं हन्ति[16] । 'हिंसार्थानां च समानकर्मकाणाम्' (३.४.४८/३३६९) इति [17]णमुलं वक्ष्यति । अहिंसार्थोऽयमारम्भः । नित्यसमासार्थो वा यथाविध्यनुप्रयोगार्थश्च[18] । पूर्वविप्रतिषेधेन हन्तेः हिंसार्थस्यापि[19] प्रत्ययोऽनेनैवेष्यते । असिघातं हन्ति । शरघातं हन्ति[20] ॥

## स्नेहने पिषः । (३८/३३८९)

करणे इत्येव[21] । स्निह्यते [22]येन तत् स्नेहनम् । स्नेहनवाचिनि करणे उपपदे पिषेर्धातोः णमुल् [23]प्रत्ययो भवति । उदपेषं पिनष्टि[24] । तैलपेषं पिनष्टि । तैलेन पिनष्टि इत्यर्थः ॥

---

1. इत्येतयोः इत्यधिकम् फ. ह. 2. धातोः नास्ति फ. 3. कषादयः यावत् वक्ष्यन्ते ब. ह. फ. 4. तत्र नास्ति फ. 5. वाक्यमिदं नास्ति फ. 6. प्रत्ययो नास्ति फ. 7. पिनष्टि नास्ति ब. ह. फ. 8. पिनष्टि नास्ति फ. 9. पिनष्टि नास्ति ब. फ. 10. इत्येव नास्ति फ. 11. समूलादिषु फ, समूलाकृतजीवेषु ह. 12. एतेषु नास्ति ब. 13. कर्मवाचिषु ब. 14. हन्कृञ्ग्रहिभ्यः ब. ह. 15. जीवन्तं गृह्णाति इति अर्थ इत्यधिकम् फ. 16. पादेन हन्ति इत्यर्थः फ. ह. 17. णमुलं नास्ति फ. 18. भवति इत्यधिकम् फ. 19. अपि नास्ति फ. 20. इति इत्यधिकम् फ. ह. 21. वर्तते इत्यधिकम् फ. ह. 22. अनेन इति ब. ह. 23. प्रत्ययो नास्ति फ. 24. उदकेन पिनष्टि इत्यर्थः इत्यधिकम् अ.